**नवमः पाठः**

# मदपरिणामः

**संस्कृतसाहित्ये कथासाहित्यस्य सुदीर्घपरम्परा वर्तते। कथाः प्रायः उपदेशात्मिकाः भवन्ति। एतासु सरलरीत्या जीवनस्य उपयोगिनः विचाराः व्यक्ताः भवन्ति। श्रीविष्णुशर्मणा विरचितं पञ्चतन्त्रं संस्कृतसाहित्यस्य सर्वश्रेष्ठं कथापुस्तकम् अस्ति। अस्मिन् पुस्तके मित्रभेदः, मित्रप्राप्तिः, काकोलूकीयम्, लब्धप्राणाशा, अपरीक्षितकारकश्चेति पञ्चतन्त्राणि सन्ति। 'मदपरिणामः' इतीयं कथा लब्धप्राणाशातन्त्रात् सङ्कलिता वर्तते। अस्मिन् पाठे अहङ्कारवशात् सदुपदेशतिरस्कारस्य दुष्परिणामः कथारूपेण वर्णितोऽस्ति।**

कस्मिंश्चिदधिष्ठाने उज्ज्वलको नाम रथकारः प्रतिवसति स्म। स चातीव दारिद्र्योपहतश्चिन्तितवान् - 'अहो ! धिगियं दरिद्रताऽस्मद्गृहे। यतः सर्वोऽपि जनः स्वकर्मण्येव रतस्तिष्ठति। अस्मदीयः पुनर्व्यापारो नात्राधिष्ठानेऽर्हति। यतः सर्वलोकानां चिरन्तनाश्चतुर्भूमिकागृहाः सन्ति। मम च नात्र। तत्किं मदीयेन रथकारत्वेन प्रयोजनम्।' इति चिन्तयित्वा देशान्निष्क्रान्तः। यावत्किञ्चिद्वनं गच्छति तावद्गह्वराकारवनगहनमध्ये सूर्यास्तमनवेलायां स्वयूथाद् भ्रष्टां प्रसववेदनया पीड्यमानामुष्ट्रीमपश्यत्। स च दासेरकयुक्तामुष्ट्रीं गृहीत्वा स्वस्थानाभिमुखः प्रस्थितः। गृहमासाद्य रज्जुं गृहीत्वा तामुष्ट्रिकां बबन्ध। ततश्च तीक्ष्णं परशुमादाय तस्याः पल्लवानयनार्थं पर्वतैकदेशं गतः। तत्र च नूतनानि कोमलानि बहूनि पल्लवानि छित्वा शिरसि समारोप्य तस्याग्रे निचिक्षेप। तया च तानि शनैः शनैर्भक्षितानि। पश्चात्पल्लवभक्षणप्रभावादहर्निशं पीवरतनुरुष्ट्री सञ्जाता। सोऽपि दासेरको महानुष्ट्रः सञ्जातः।

ततः स नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति। अथ रथकारेण वल्लभत्वाद्दासेरकग्रीवायां महतीघण्टा प्रतिबद्धा। पश्चाद्रथकारो व्यचिन्तयत् - 'अहो ! किमन्यैर्दुष्कृतकर्मभिः, यावन्ममैतस्मादेवोष्ट्रपरिपालनादस्य कुटुम्बस्य भव्यं सञ्जातम्। तत्किमन्येन व्यापारेण।' एवं विचिन्त्य गृहमागत्य प्रियामाह - 'भद्रे ! समीचीनोऽयं व्यापारः। तव सम्मतिश्चेत्कुतोऽपि धनिकात्किञ्चिद् द्रव्यमादाय मया गुर्जरदेशे गन्तव्यं कलभग्रहणाय। तावत्त्वयैतौ यत्नेन रक्षणीयौ। यावदहमपरामुष्ट्रीं नीत्वा समागच्छामि।'

ततश्च गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः। किं बहुना ? तेन तथा कृतं यथा तस्य प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः। ततस्तेन महदुष्ट्रयूथं कृत्वा रक्षापुरुषो धृतः। तस्य प्रतिवर्षं वृत्या करभमेकं प्रयच्छति। प्रतिवर्षं अन्यच्चाहर्निशं दुग्धपानं तस्य निरूपितम्। एवं रथकारोऽपि नित्यमेवोष्ट्रीकरभव्यापारं कुर्वन्सुखेन तिष्ठति। अथ ते दासेरका अधिष्ठानोपवनाहारार्थं गच्छन्ति। कोमलवल्लीर्यथेच्छया भक्षयित्वा महति सरसि पानीयं पीत्वा सायंतनसमये मन्दं-मन्दं लीलया गृहमागच्छन्ति। स च पूर्वदासेरको मदातिरेकात्पृष्ठे आगत्य मिलति।

ततस्तैः कलभैरभिहितम् - 'अहो मन्दमतिरयं दासेरको यथा यूथाद् भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन्नागच्छति। यदि कस्यापि दुष्टसत्त्वस्य मुखे पतिष्यति, तन्नूनं मृत्युमवाप्स्यति। अथ तस्य तद्वनं गाहमानस्य कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः।

यावदवलोकयति, तावदुष्ट्रीदासेरकाणां यूथं गच्छति। एकस्तु पुनः पृष्ठे क्रीडां कुर्वन्वल्लरीश्चरन्यावत्तिष्ठति, तावदन्ये दासेरकाः पानीयं पीत्वा स्वगृहं गताः।'

सोऽपि वनान्निष्क्रम्य यावद्दिशोऽवलोकयति, तावन्न कञ्चिन्मार्गं पश्यति वेत्ति च। यूथाद् भ्रष्टो मन्दं-मन्दं बृहच्छब्दं कुर्वन्यावत्कियद्दूरं गच्छति, तावत्तच्छब्दानुसारी सिंहोऽपि क्रमं कृत्वा निभृतोऽग्रे व्यवस्थितः। ततो यावदुष्ट्रः समीपमागतः, तावत्सिंहेन लम्भयित्वा ग्रीवायां गृहीतो मारितश्च। अतोऽहं ब्रवीमि -

***सतां वचनमादिष्टं मदेन न करोति यः।***

***स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरम्॥***

## शब्दार्थः

अधिष्ठाने - स्थान में/नगर में। रथकारः - रथ बनाने वाला। दारिद्र्योपहतश्चिन्तितवान् - गरीबी से परेशान होकर निश्चित किया। चतुर्भूमिकाः - चौमंजिला। मदीयेन - मेरे द्वारा। गह्वराकारवनगहनमध्ये - गुफा के आकार के घने जंगल के बीच। दासेरकः - ऊँट का बच्चा। आसाद्य - पहुँचकर। रज्जुम् - रस्सी को। परशुमादाय - कुल्हाड़ी लेकर। निचिक्षेप - फेंका/रखा। पीवरतनुः - स्थूलशरीर। वल्लभत्वात् - प्रेमवश/स्नेहवश। दुष्कृतकर्मभिः - निन्दितकर्मों के द्वारा। कलभग्रहणाय - ऊटों को लेने के लिए। किं बहुना - और अधिक क्या ? करभाः - बहुत से ऊँट। अभिहितम् - कहा। गाहमानस्य - विचरण करता हुआ। घण्टारवम् - घण्टे की आवाज को। आकर्ण्य - सुनकर। निभृतः - चुपचाप। छिपा हुआ। लम्भयित्वा - छलाँग लगाकर।

## पदच्छेदः

| | | |
|---|---|---|
| कस्मिंश्चिदधिष्ठाने | - | कस्मिंश्चित् + अधिष्ठाने। |
| दारिद्र्योपहतश्चितन्तितवान् | - | दारिद्र्य + उपहतः + चिन्तितवान् |
| धिगियम् | - | धिक् + इयम् |
| दरिद्रताऽस्मद्गृहे | - | दरिद्रता + अस्मद्गृहे |
| स्वकर्मणैव | - | स्वकर्मणा + एव |
| नात्राधिष्ठानेऽर्हति | - | न + अत्र + अधिष्ठाने + अर्हति |
| पीड्यमानामुष्ट्रीमपश्यत् | - | पीड्यमानाम् + उष्ट्रीम् + अपश्यत् |
| पश्चात्पल्लवभक्षणप्रभावादहर्निशम् | - | पश्चात् + पल्लवभक्षणप्रभावात् + अहर्निशम् |
| वल्लभत्वाद्दासेरकग्रीवायाम् | - | वल्लभत्वात् + दासेरकग्रीवायाम् |
| किमन्यैर्दुष्कृतकर्मभिः | - | किम् + अन्यैः + दुष्कृतकर्मभिः |
| यावन्ममैतस्मादेवोष्ट्रपरिपालनादस्य | - | यावत् + मम + एतस्मात् + एव + उष्ट्रपरिपालनात् + अस्य |
| तत्किमन्येन | - | तत् + किम् + अन्येन |

| | | |
|---|---|---|
| तावत्त्वयैतौ | - | तावत् + त्वया + एतौ |
| यावदहमपरामुष्ट्रीम् | - | यावत् + अहम् + अपराम् + उष्ट्रीम् |
| गत्वोष्ट्रीम् | - | गत्वा + उष्ट्रीम् |
| अन्यच्चाहर्निशम् | - | अन्यत् + च + अहर्निशम् |
| नित्यमेवोष्ट्रीकरभव्यापारम् | - | नित्यम् + एव + उष्ट्रीकरभव्यापारम् |
| अधिष्ठानोपवनाहारार्थम् | - | अधिष्ठान + उपवन + आहार + अर्थम् |
| कोमलवल्लीर्यथेच्छया | - | कोमलवल्ली: + यथा + इच्छया |
| घण्टारवमाकर्ण्य | - | घण्टारवम् + आकर्ण्य |
| कुर्वन्वल्लरीश्चरन्यावत्तिष्ठति | - | कुर्वन् + वल्लरी: + चरन् + यावत् + तिष्ठति |
| विनाशमवाप्नोति | - | विनाशम् + अवाप्नोति |

## अभ्यास:

**1. एकपदेन उत्तरं लिखत –**

(क) रथकारस्य नाम किम् आसीत् ?

(ख) रथकार: वने काम् अपश्यत् ?

(ग) महती घण्टा केन प्रतिबद्धा ?

(घ) क: महानुष्ट्र: सञ्जात: ?

(ङ) रक्षापुरुषस्य प्रतिवर्षं का वृत्ति:?

**2. एकवाक्येन उत्तरं लिखत –**

(क) उज्ज्वलक: कां गृहीत्वा स्वस्थानाभिमुखं प्रस्थित: ?

(ख) रथकार: पवर्तदेशे किमर्थं गत: ?

(ग) दासेरका: आहारार्थं कुत्र गच्छन्ति ?

(घ) दासेरका: कस्मिन् समये गृहमागच्छन्ति ?

(ङ) अस्या: कथाया: सार: क: ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) उष्ट्री पीवरतनु: कथं सञ्जाता ?

(ख) रथकार: किमर्थं गुर्जरदेशं गतवान् ?

(ग) क: व्यापार: समीचीन: ?

4. **यथायोग्यं योजयत -**

| 'अ' | 'आ' |
|---|---|
| (क) जनः स्वकर्मण्येव | पीड्यमाना |
| (ख) प्रसववेदनया | उष्ट्रिकां बबन्ध |
| (ग) रज्जुं गृहीत्वा | महतीघण्टा प्रतिबद्धा |
| (घ) दासेरकग्रीवायाम् | मन्दमतिः |
| (ङ) यूथाद् भ्रष्टः दासेरकः | रतस्तिष्ठति |

5. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) पल्लवभक्षणप्रभावात् पीवरतनुरुष्ट्री सञ्जाता। ☐

(ख) उज्ज्वलकः नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति। ☐

(ग) उज्ज्वलकेन महदुष्ट्रयूथं कृत्वा रक्षापुरुषो धृतः। ☐

(घ) यूथाद् भ्रष्टः दासेरकः घण्टां वादयन्नागच्छति। ☐

(ङ) कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः। ☐

6. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा - तिष्ठति | स्था (तिष्ठ्) | लट्लकारः | प्रथमपुरुषः | एकवचनम् |
| (क) अपश्यत् | | | | |
| (ख) समागच्छामि | | | | |
| (ग) मिलति | | | | |
| (घ) पतिष्यति | | | | |

7. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| शब्दः | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| यथा - चातीव | च + अतीव | दीर्घस्वरसन्धिः |
| (क) ततश्च | | |
| (ख) सोऽपि | | |
| (ग) यथेच्छया | | |
| (घ) तन्नूनम् | | |

8. **समासविग्रहं कृत्वा समासनाम लिखत –**

(क) प्रतिवर्षम्

(ख) दारिद्र्योपहत:

(ग) प्रसववेदनया

(घ) पीरवरतनु:

(ङ) रथकार:

9. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत –**

(क) **रथकार:** प्रतिवसति स्म ।

(ख) **मम** गृहे उष्ट्र: अस्ति ।

(ग) स **दुग्धं** गृहीत्वा स्वकुटुम्बं परिपालयति ।

(घ) स: **यूथाद्** भ्रष्टोऽभवत् ।

(ङ) **कलभै:** अभिहितम् ।

10. **कथाक्रमं संयोजयत –**

(क) उष्ट्र: यूथाद् भ्रष्टोऽभवत् ।

(ख) सिंहेन उष्ट्र: मारित: ।

(ग) रथकार: गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागत: ।

(घ) तेन प्रचुरा उष्ट्रा: करभाश्च सम्मिलिता: ।

(ङ) वने प्रसववेदनया पीड्यमानाम् उष्ट्रीम् अपश्यत् ।

(च) रथकार: दारिद्र्योपहत: देशान्निष्क्रान्त: ।

## योग्यताविस्तार: –

- ''मदपरिणाम:'' इत्यस्य पाठस्य कलेवरमाधृत्य सरलसंस्कृतसंवादरीत्या पाठविषयकचर्चां कुरुत।
- पञ्चतन्त्रस्य अन्या: कथा: पठत।
- संस्कृतसाहित्यस्य अन्या: कथा: पठत।